नादनं विना केवलेन भेषजेन प्रतिकर्त्तुमशक्यत्वात् । एषोऽतिसारः वैद्यैः कष्टः कष्टेन साध्यः । प्रदिष्टः कथित इत्यर्थः ॥ * ॥ अथागन्तुजत्वेन साम्यात् भयातिसारस्यापि संप्राप्तिपूर्ब्बकं लक्षणमत्रैवाह ।

“भयेन क्षोभिता दोषा दूषयन्ति मलं यदा ।
तदातिसार्य्यते तन्तु क्षिप्रमुष्णजलप्लवं ॥
वातपित्तातिसारस्य प्रायो लिङ्गैः समन्वितं ।
न भयोपशमाच्छर्म्म यस्मिन् स्यात् स भयात् स्मृतः॥

प्लवत इति प्लवं जले प्लवमानं । ननु भयातिसारस्य कथमागन्तुजत्वमयमपि दोषज एव । यत आह । भयेन क्षोभिता दूषिता दोषा मलं दूषयन्ति । तन्मलमतिसरति । अत्र पूर्ब्बमेव दोषसम्बन्धः । उच्यते ।

“रागद्वेषभयात् ये च ते स्युरागन्तवो गदाः” ।

इति वचनाद्भयातीसार आगन्तुज एव । श्लोकस्य त्वयमर्थः । भयेनैव हेतुभूतेन दोषा वातपित्तकफा अतीसाराय क्षोभिताः सञ्चालिताः न दूषिता भयेन त्रयाणामपि दोषाणां दूषणासम्भवात् । अतिसर्त्तुं चलिता वातपित्तकफा मलं दूषयन्ति तत् सर्व्वं वातपित्तकफमलं भयेनैवातिसार्य्यते । पश्चाद्वातसम्बन्धो भयाद्वायुरिति वचनात् । अतएव भयातिसारे वातहर्य्येव क्रिया कथितेति समाधिः ॥ * ॥ अथ तयोश्चिकित्सा ।

“भयशोकसमुद्भूतौ ज्ञेयौ वातातिसारवत् ।
तयोर्व्वातहरी कार्य्या हर्षणाश्वासनैः क्रिया” ॥

वातातिसारवत् वातातिसारलक्षणैः । तयोश्चिकित्सा च हर्षणाश्वासनपूर्ब्बिका वातहरी कार्य्या ॥ * ॥ अथामातीसारस्य संप्राप्तिपूर्ब्बकं लक्षणमाह ।

“अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तो-
दोषाः कोष्ठे धातुसंघान् मलाञ्च ।
नानावर्णं नैकशः सारयन्ति
शूलोपेतं षष्ठमेनं वदन्ति ॥

अन्नं भुक्तं तदजीर्णं चेति कर्म्मधारये अन्नाजीर्णं तस्मात् प्रद्रुता उपद्रुताः । क्षोभयन्तः चालयन्तः । नैकश इत्यत्र नाकादित्वान्नात्तरविपर्य्ययः । नन्वामेन दोषा दूष्यन्ते गुर्व्वादिभक्षणादिभिरिव ते चातीसारमुत्पादयन्ति । तत्वाममेवातीसारमुत्पादयति । तेनामातीसारोऽपि दोषज एव किमर्थमयं पृथगुच्यते । उच्यते । आमातीसारस्य चिकित्साविशेषार्थं सम्प्राप्तिपूर्ब्बको लक्षणविशेषः पृथगुक्तः । कः स चिकित्साविशेषस्तमाह । अतिसारेषु सर्व्वेष्वेव संग्राहकमौषधमुक्तमामातीसारे तु ग्राहकं विरुद्धं । यत उक्तं ।

“नामे संग्राहकं विद्यादतीसारे कदाचन ।
संग्रहीतो बलादामो विकारान् कुरुते बहून्” ॥

इति । बलाद्भेषजबलात् । विकारान् ग्रहण्याध्मानशूलगुल्मशोथोदरज्वरादीन् ॥ * ॥ तस्य चिकित्सा ।

“वत्सकातिविषा शुण्ठी बिल्वहिङ्गुयवाम्बुदाः ।
चित्रकेण युता एषां क्वाथ आमातिसारनुत्” ॥

आमातिसारस्य चिकित्सा पूर्ब्बमुक्तैव ॥ * ॥

“शोथघ्नीन्द्रयवाः पाठा विडङ्गातिविषा घनाः ।
क्वथिताः सोषणाः पीताः शोथातिसारनाशनाः” ॥

शोथघ्नी पुनर्नवा । उषणं मरिचं । सशोथातीसारे ॥ * ॥

“आमास्थिमध्यमालूरफलक्वाथः समाक्षिकः ।
शर्करासहितो हन्यात् छर्द्यतीसारमुल्वणं ॥”

मालूरफलं बिल्वफलं ।

“कषायो भृष्टमुद्गस्य सलाजमधुशर्करः ।
निहन्याच्छर्द्यतीसारं तृष्णादाहं ज्वरं भ्रमं” ॥

छर्द्यतीसारे ॥ * ॥

“दध्ना ससारेण समाक्षिकेण
भुञ्जीत निःसारकपीडितस्तु ।
सुतप्तकुप्यक्वथितेन चापि
क्षीरेण शीतेन मधुप्लुतेन” ॥

निःसारकः निढ़ाही इति लोके । सुतप्तकुप्यक्वथितेन । सुतप्तसुवर्णरजतताम्रलोहनिर्व्वापणक्वथितेन । भुञ्जीत पथ्यमिति शेषः ॥ निःसारके ॥ * ॥

“दीप्ताग्निर्निष्पुरीषो यः सार्य्यते फेनिलं शकृत् ।
स पिबेत् फाणितं शुण्ठीं दधि तैलं पयो घृतं ॥
बला बिल्वाश्रृतं क्षीरं गुड़तैलानुयोजितं ।
दीप्ताग्निं पाययेत् प्रातः सुखदं वर्च्चसक्षये” ॥

पुरीषक्षये ॥ * ॥

“तुलां संकुट्य बिल्वस्य पचेत् पादावशेषितं ।
सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः ॥
बिल्वं सधातकीकुष्ठं शुण्ठी रास्ना पुनर्नवा ।
देवदारु वचा मुस्तं लोध्रमोचरसान्वितं ॥
एभिर्म्मृदग्निना पक्वं ग्रहण्यर्शोऽतिसारनुत् ।
बिल्वतैलमिति ख्यातमत्रिपुत्त्रेण भाषितं ॥
ग्रहण्यर्शोऽधिकारे ये स्नेहाः समुपदर्शिताः ।
प्रयोज्यास्तेऽतिसारेऽपि त्रयाणां तुल्यहेतुता” ॥

त्रयाणां ग्रहण्यर्शोऽतिसाराणां । बिल्वतैलं ॥ * ॥ अथातिसारभेदस्य प्रवाहिकाख्याधेः संप्राप्तिपूर्ब्बकलक्षणमाह ।

“वायुः प्रवृद्धो निचितं बलासं
नुदत्यधस्तादहिताशनस्य ।
प्रवाहतोऽल्पं बहुशो मलाक्तं
प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः” ॥

अस्यायमर्थः । अहिताशनस्य अतिशयेन वातलभक्ष्यभोजिनः । प्रवृद्धो वायुः प्रवाहतः कण्ठहृद्बलेन सशब्दं वायुमपानमार्गेण त्यजतः । निचितं सञ्चितं । बलासं कफं । मलाक्तं पुरीषयुक्तं अल्पं । बहुशः वारंवारं । अधस्तात् गुदमार्गेण । नुदति प्रेरयति । तज्ज्ञाः पुराणा वैद्याः । तां प्रवाहिकां । प्रवदन्ति कथयन्ति ॥ * ॥

तस्या वातजादिभेदेन रूपमाह ।

“प्रवाहिका वातकृता सशूला
पित्तात् सदाहा सकफा कफाच्च ।
सशोणिता शोणितसम्भवाच्च
ताः स्नेहरूक्षप्रभवा मतास्तु” ॥

तत्र रूक्षप्रभवा वातजा । स्नेहप्रभवा कफजा । तुशब्दात्तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च । तासामतीसारवदादिशेच्च लिङ्गं क्रमं चामविपक्वताञ्च । क्रमं चिकित्सां ॥ * ॥ तस्याश्चिकित्सामाह ।

“बिल्वपेशी गुड़ं लोध्रं तैलं मरिचसंयुतं ।
लीढ्वा प्रवाहिकाक्रान्तः सत्वरं सुखमाप्नुयात्” ॥

बिल्वादिरवलेहः ॥ * ॥

“धातकीवदरीपत्रकपित्थरसमाक्षिकं ।
सलोध्रमेकतो दध्ना पिबेन्निर्व्वाहिकार्द्दितः” ॥

एकतः प्रत्येकं दध्ना पिबेदित्यर्थः । निर्व्वाहिका प्रवाहिका । धातक्यादिः ॥ * ॥ अथ असाध्यातिसारिणोलक्षणमाह ।

“पक्वजाम्बवसंकाशं यकृत्खण्डनिभं तनुं ।
घृततैलवसामज्जवेसवारपयोदधि ।
मांसधावनतोयाभं कृष्णं नीलारुणप्रभं ॥
कुणपं सकृदालोक्य नातिसारमुपक्रमेत् ।
तृष्णादाहारुचिश्वासहिक्कापार्श्वास्थिशूलिनं” ॥
संमूर्च्छारतिसंमोहयुक्तं पक्ववलीगुदं ।
प्रलापयुक्तञ्च भिषक् वर्ज्जयेदतिसारिणं ॥

संमूर्च्छा सकलेन्द्रियमनसां स्वस्वविषयग्रहणाशक्तिहेतुरवस्थाविशेषः । संमोहः विकृतमतित्वं ।

“असंवृतगुदं क्षीणं शूलाध्मानैरुपद्रुतं ।
गुदे पक्वे गतोष्माणमतीसारिणमुत्सृजेत् ॥

असंवृतगुदं गुदसंवरणाक्षमं । गुदे पक्वे गतोष्माणं गुदपाकारम्भके पित्ते विद्यमानेऽपि शीतगात्रं नष्टाग्निं वा ।

“श्वासशूलपिपासार्त्तं क्षीणं ज्वरनिपीड़ितं ।
विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥
शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकं ।
छर्द्दिमूर्च्छाञ्च हिक्काञ्च दृष्ट्वातिसारिणं त्यजेत् ॥
हस्तपादाङ्गुलीसन्धिप्रपाको मूत्रनिग्रहः ।
पुरीषस्योष्णतातीव मरणायातिसारिणां ॥
अतीसारी राजरोगी ग्रहणीरोगवानपि ।
मांसाग्निबलहीनो यो दुर्लभं तस्य जीवनं ॥
बाले वृद्धे त्वसाध्योऽयं लिङ्गैरेतैरुपद्रुतः ।
अपि यूनामसाध्यः स्यादतिदुष्टेषु धातुषु” ॥

एतैर्लिङ्गैः पर्व्वोक्तैः पक्वजाम्बवसंकाशत्वादिभिः ॥ * ॥ अथातिसारयुक्तस्य लक्षणं ।

“यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघु कोष्ठस्य स्थितस्तस्योदरामयः” ॥

उच्चारं पुरीषं विना स्थितः निवृत्त उदरामयोऽतिसारः ॥ * ॥ अथातीसारिणो वर्ज्जनीयान्याह ।

“स्नानावगाहनाभ्यङ्गगुरुस्निग्धादिभोजनं ।
व्यायाममग्निसन्तापमतीसारी विवर्ज्जयेत्” ॥

स्नानमुद्धृतजलेन । अवगाहनं नद्यादौ । इत्यतीसाराधिकारः । इति भावप्रकाशः ॥

अतिसारकी, [न्] त्रि, (अतिसार + स्वार्थे कन् ततो मत्वर्थे इन्) सातिसारः । अतिसाररोगयुक्तः । उदरामयी । इत्यमरः ॥

अतिसाम्या, स्त्री, (साम्यं समतामतिक्रान्ता अत्यादीति समासः अतुल्यस्वलयुक्ता इति यावत् ।)